International Journal of Sanskrit Research 2024; 10(3): 293-296

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2024; 10(3): 293-296
© 2024 IJSR
www.anantaajournal.com
Received: 07-02-2024
Accepted: 10-03-2024

**रमेशमालाकारः**
शोधच्छात्रः (व्याकरणविभागः)
राष्ट्रिय संस्कृत विश्वविद्यालयः,
तिरुपतिः, आंध्र प्रदेश, भारत

**Corresponding Author:**
**रमेशमालाकारः**
शोधच्छात्रः (व्याकरणविभागः)
राष्ट्रिय संस्कृत विश्वविद्यालयः,
तिरुपतिः, आंध्र प्रदेश, भारत

# रामायणस्य बालकाण्डस्य भूषणटीकायां कारकप्रभावः

**रमेशमालाकारः**

## प्रस्तावना

वाक्यनिर्माणे जीवातुः खलु कारकम्। विवक्षातः कारकाणि भवन्तीति उक्तौ सत्यामपि व्याकरणनियमं भाषाप्रयोगनियमः चानुसृत्य कारकस्य बलीयस्त्वं गमनार्हं भवति। भूषणटीकायां कारकस्य प्रभावः, कारकस्य प्रयोगोऽत्र प्रदर्श्यते।

## कारकस्य समान्यपरिचयः

करणार्थकात् कृञ् इति धातोः (ण्वुल्तृचौ)[1] इति सूत्रेण कर्त्तर्यर्थे ण्वुल्प्रत्ययेऽनुबन्धलोपे कृ वु इति स्थितौ (युवोरनाकौ)[2] इति सूत्रेण वु इत्यस्य स्थाने अक इत्यादेशे (अचो ञ्णिति)[3] इति सूत्रेण ऋकारस्य स्थाने आर् इति वृद्धौ कारक इति शब्दः निष्पद्यते। अस्य कारकशब्दस्यार्थो भवति करोतीति। करोतीति पदस्य चात्र जनयतीत्यर्थः। एवञ्च यत्करोति जनयति तत्कारकमित्युच्यते। तत्र किञ्जनयतीति जिज्ञासायां क्रियामिति पदमध्याह्रियते, ततश्च यत्क्रियाञ्जनयति तत्कारकमित्युच्यते। अर्थाद्यत्क्रियाजनकं तत्कारकम्। एवञ्च क्रियाजनकत्वङ्कारकत्वमिति कारकस्य लक्षणं भवति। तत्र जनकत्वं नाम कारणत्वम्, एवञ्च क्रियाकारणत्वं कारकत्वमिति लक्षणं फलितम्। कारणत्वञ्च कार्यनियतपूर्ववृत्तित्वम्। एवञ्च क्रियानियतपूर्ववृत्तित्वङ्कारकत्वमिति कारकस्य निष्कृष्टं लक्षणं सिद्ध्यति।

शास्त्रकारैः कारकलक्षणं बहुधा प्रपञ्चितम्। यथोच्यते –

1. करोति कर्तृकर्मादिव्यपदेशानिति कारकम् – पतञ्जलिः।
2. क्रियाहेतुः कारकम् – काशिकाकारः।
3. साधनं कारकम् – वाक्यपदीये – भतृहरिः।
4. शक्तिः कारकम् – प्रदीपे – कैयटः।
5. क्रियाजनकत्वं कारकत्वम् – लघुशब्देन्दुशेखरे – नागेशः।
6. क्रियान्वयित्वं कारकत्वम् – प्रौढमनोरमायाम् – भट्टोजिदीक्षितः।
7. विभक्त्यर्थद्वारा क्रियान्वयि सत् क्रियानिमित्तं कारकम् – नैयायिकाः।

---

[1] पा.सू. ३.१.१३३
[2] पा.सू. ७.१.१
[3] पा.सू. ७.२.११५

कारकाणि- कर्ता कर्म करणं सम्प्रदानम् अपादानम् अधिकरणम् इत्येतानि षट् सन्ति। उच्यते –

कर्ता कर्माथ करणं सम्प्रदानं तथैव च।
अपादानाधिकरणे कारकाणि षडेव हि ॥[4]

| क्र. | कारकाणि | सूत्राणि |
|---|---|---|
| १. | कर्तृकारकम् | स्वतन्त्रः कर्ता |
| २. | कर्मकारकम् | कर्तुरीप्सिततमं कर्म |
| ३. | करणकारकम् | साधकतमं करणम् |
| ४. | सम्प्रदानकारकम् | कर्मणा यमभिप्रैति स सम्प्रदानम् |
| ५. | अपादानकारकम् | ध्रुवमपायेऽपादानम् |
| ६. | अधिकरणकारकम् | आधारोऽधिकरणम् |

**कर्तृकारकम्**
चैत्रेण गम्यते इत्यत्र गमनक्रियायाः पूर्वं नियमेन चैत्रो वर्तते, यतो हि चैत्रस्य गमनक्रियायाः पूर्वं चैत्रो नास्ति चेत्तु गमनक्रिया नैव सम्भवति। अतो गमनक्रियानियतपूर्ववृत्तित्वाच्चैत्रो गमनक्रियां प्रति कारकमस्ति। तच्च गमनक्रियां प्रति कर्ताऽप्यस्त्येवञ्च चैत्रः कर्तृकारकम्।

**कर्मकारकम्**
पाचकेन पच्यते, रामेण लिख्यते, भरतेन पठ्यते इत्यादौ सर्वत्रैव बोध्यम्। चैत्रो ग्रामङ्गच्छतीत्यत्र ग्रामोऽपि गमनक्रियायाः नियतपूर्ववृत्तिर्वर्तते। यतोहि गमनक्रियायाः पूर्वङ्ग्रामस्याऽभावे सति कश्चिदपि ग्रामङ्गन्तुं नैव पारयति, तस्माद्ग्रामस्यापि गमनक्रियानियतपूर्ववृत्तित्वात्कारकत्वम्, तच्च गमनक्रियां प्रति कर्माऽस्तीति हेतोर्ग्रामः कर्मकारकमित्युच्यते।

**करणकारकम्**
एवं चैत्रः यानेन गच्छतीत्यत्र यानमपि गमनक्रियानियतपूर्ववृत्तिर्वर्तते। यतोहि गमनात्पूर्वं यानाभावे न हि यानेन गन्तु शक्यते, तस्माद्यानस्यापि कारकत्वम्. तद्गमनं प्रति करणमस्तीति कृत्वा यानङ्करणकारकमित्युच्यते।

**सम्प्रदानकारकम्**
चैत्रो विप्राय धनन्ददातीत्यत्र विप्रोऽपि दानक्रियायाः पूर्वमस्ति। यतो हि दानक्रियायाः पूर्वं विप्रस्याभावे न हि कोऽपि विप्राय किमपि दातुं शक्नोति। अतः दानक्रियानियतपूर्ववृत्तित्वाद्दानक्रियां प्रति विप्रोऽपि कारकमस्ति। तच्च दानं प्रति सम्प्रदानमप्यस्तीत्यतो विप्रस्सम्प्रदानकारकमित्युच्यते।

**अपादानकारकम्**
वृक्षात्पत्रं पततीत्यत्र पतनक्रियायाः पूर्वमेव वृक्षोऽस्ति यतोहि पतनात्पूर्वं वृक्षाभावे सति न हि वृक्षात्पतनं सम्भवति। अतो वृक्षोऽअपादानकारकमित्युच्यते।

**अधिकरणकारकम्**
चैत्रस्स्थाल्यान्तण्डुलं पचतीत्यत्र पाकक्रियायाः पूर्वं स्थाली वर्तते। यतो हि पाकात्पूर्वं स्थाल्यभावे सति स्थाल्यां पाकः केनापि कर्तुं न शक्यते। तस्मात्पाकक्रियानियतपूर्ववृत्तित्वात्स्थाली पाकक्रियां प्रति कारकमस्ति। सा च पाकं प्रत्यधिकरणमस्ति। अतस्स्थाली अधिकरणकारकमित्युच्यते। तस्माद्गमनादिक्रियां प्रति सम्बन्धस्य नियतपूर्ववृत्तित्वाभावेन सम्बन्धो न कारकमिति। इत्थञ्च कारकाणि षडिति निरूपितम्।
पुनश्चोक्तानुक्तभेदेन सर्वाण्यपि कारकाणि द्विविधानि भवन्ति। ततश्च कारकं द्वादशविधमिति फलितम्। तथाहि उक्तः कर्ता, अनुक्तः कर्ता। उक्तं कर्म, अनुक्तं कर्म। उक्तं करणम्, अनुक्तं करणम्। उक्तं सम्प्रदानम्, अनुक्तं सम्प्रदानम्। उक्तम् अपादानम्, अनुक्तम् अपादानम्। उक्तम् अधिकरणम्, अनुक्तम् अधिकरणम्। एवञ्चोच्यते-

उक्तानुक्ततया द्वेधा कारकाणि भवन्ति षट्।
उक्ते तु प्रथमैव स्यादनुक्ते तु यथाक्रमम् ॥[5]

**भूषणटीकायां कारकस्य प्रभावः**
**राज्याय**

नियुज्यमानो राज्याय नैच्छद्राज्यं महाबलः।
स जगाम वनं वीरो रामपादप्रसादकः ॥[6]

(क्रियार्थोपपदस्य च कर्मणि स्थानिनः)[7] इति सूत्रेण क्रियाफलकं यदि क्रियावाचकं पदम्, तदुपपदं यस्य तुमुन्नन्तस्य तथाभूतम्, यदप्रयुज्यमानं तुमुन्नन्तम्, ण्वुलन्तं वा तत्प्रकृतिभूतो यो हि धातुः तदुपस्थाप्या या क्रिया तत्कर्मणि चतुर्थीविभक्तिर्विधीयते। अर्थात् क्रियाफलकक्रियावाचकोपपदकमप्रयुज्यमानं तुमुन्नन्तं ण्वुलन्तं वा

[4] सि.कौ., गोविन्दाचार्यः, भूमिकाभागः

[5] सिद्धान्तकौमुदी, गोविन्दाचार्यः, भूमिकाभागः

[6] रामा. १.१.३४, टीका.पृ. २९

[7] पा.सू. २.३.१४

तदुपस्थाप्य क्रियाकर्मणि चतुर्थीविभक्तिर्विधीयते। तथा च राज्याय नियुज्यमानः इति प्रयोगे राज्यङ्कर्तुं नियुज्यमानः इति इत्यर्थः। एवञ्च नियोजनक्रिया करणक्रियार्था वर्तते। ततश्च क्रियार्थाक्रिया नियोजनक्रिया तद्वाचकं पदं नियुज्यमानः इति पदम्। तदुपपदकस्य कर्तुमिति तुमुन्नन्तस्यात्राप्रयोगो वर्तते। तादृशतुमुन्नन्तपदोपस्थाप्या या करणक्रिया तत्कर्म राज्यम्, अतस्तत्र प्रकृतसूत्रेण चतुर्थीविभक्तिरिति। यदा तु तुमुन्नन्तस्य प्रयोगो भवति तदा तु द्वितीया एव भवति। राज्यं कर्तुं नियुज्यमानः इति। तथा च भूषणटीकायामुच्यते-
राज्यं कर्तुं नियुज्यमानः। क्रियार्थोपपदस्य च कर्मणि स्थानिनः इति चतुर्थी। राज्यं राजत्वम्।

**गमनाय**

सुप्रभाता निशा राम पूर्वा सन्ध्या प्रवर्तते।
उत्तिष्ठोत्तिष्ठ भद्रं ते गमनायाभिरोचय॥[8]

(क्रियार्थोपपदस्य च कर्मणि स्थानिनः)[9] इति सूत्रेण क्रियाफलकं यदि क्रियावाचकं पदम्, तदुपपदं यस्य तुमुन्नन्तस्य तथाभूतम्, यदप्रयुज्यमानं तुमुन्नन्तम्, ण्वुलन्तं वा तत्प्रकृतिभूतो यो हि धातुः तदुपस्थाप्या या क्रिया तत्कर्मणि चतुर्थीविभक्तिर्विधीयते। अर्थात्क्रियाफलकक्रियावाचकोपपदकमप्रयुज्यमानं तुमुन्नन्तं ण्वुलन्तं वा तदुपस्थाप्य क्रियाकर्मणि चतुर्थीविभक्तिर्विधीयते। तथा च गमनाय अभिरोचयेति प्रयोगे गन्तुमभिरोचयेत्यर्थः। एवञ्चाऽभिरोचनक्रिया गमनक्रियार्था वर्तते। ततश्च क्रियार्थाक्रियाऽभिरोचनक्रिया तद्वाचकं पदमभिरोचयेति पदम्। तदुपपदकस्य गन्तुमिति तुमुन्नन्तस्यात्राप्रयोगो वर्तते। तादृशतुमुन्नन्तपदोपस्थाप्या या गमनक्रिया तत्कर्म गमनम्, अतस्तत्र प्रकृतसूत्रेण चतुर्थीविभक्तिरिति। तथा च भूषणटीकायामुच्यते- गमनाय गन्तुम् क्रियार्थोपपदस्य इति चतुर्थी।[10] अन्यत्र –

अभिवाद्य महातेजा गमनायोपचक्रमे॥[11]

अस्मिन्श्लोके - गमनाय इति पदस्य (तुमर्थाच्च भाववचनात्) इत्यनेन चतुर्थी। टीकाकारैः टीकायामुक्तमपि – गमनाय गन्तुम् "तुमर्थाच्च भाववचनात्" इति चतुर्थी।[12]

[8] रामा. १.३५.२, टीका.पृ. २४०
[9] पा.सू. २.३.१४
[10] टीका.पृ. २४०
[11] रामा.१.२८.२८, टीका.पृ. २१२
[12] टीका.पृ. १२१

**पुरीमध्यवसत्**

स राजा ब्रह्मदत्तस्तु पुरीमध्यवसत्तदा।
काम्पिल्यां परया लक्ष्म्या देवराजो यथा दिवम्॥[13]

अत्र पुरीमध्यवसदिति पाठः। राजा ब्रह्मदत्तः पुरीमध्यवसदिति। पुरीमध्यवसदित्यत्र (उपान्वध्याङ्वसः)[14] इति सूत्रेणोपादिपूर्वस्य वसतेः आधारः कर्मसंज्ञा भवति। अर्थात् उपोपसर्गपूर्वकस्यानूपसर्गपूर्वकस्याध्युपसर्गपूर्वकस्याङुपसर्गपूर्वकस्य च वस्धातोः आधारः कर्म स्यात्। अत्र पुरीमध्यवसदिति पदमस्ति। अध्युपसर्गपूर्वकस्य वस्धातोः प्रयोगः कृतः। अध्यवसदित्यस्यार्थः वासानुकूलव्यापार इति। वाक्येऽस्मिन् राजा कर्ता। कर्तृद्वारा वासानुकूलव्यापारस्य आधारः पुरी। अतोऽत्र पुरीति शब्दस्याधिकरणसंज्ञा प्राप्ता। यदाधिकरणसंज्ञा प्रवृत्ता भवति तदा आधारे (सप्तम्यधिकरणे च)[15] इत्यनेन सूत्रेण सप्तमी प्रवर्तते। किञ्च तामधिकरणसंज्ञां निषिध्य (उपान्वध्याङ्वसः)[16] अनेन सूत्रेण कर्मसंज्ञा विधीयते। अतः पुरीशब्दाद्द्विताया (कर्मणि द्वितीया)[17] इति सूत्रेण। भूषणे उच्यते – अध्यवसत् "उपान्वध्याङ्वसः" इति कर्मत्वम्।[18]

**शैलेन्द्रं**

अथ ज्येष्ठां सुराः सर्वे देवकार्यचिकीर्षया।
शैलेन्द्रं वरयामासुर्गङ्गां त्रिपथगां नदीम्॥[19]

भूषणे लिख्यते "अकथितं च" इति शैलेन्द्रस्य कर्मत्वम्। सर्वे सुराः त्रिपथगां नदीं (गङ्गां) शैलेन्द्रं वरयामासुः (ययाचे) इति। अत्र 'सुराः शैलेन्द्रात्गङ्गां वरयामासुः' इति किनर्थं न, शैलेन्द्रमिति कथम् – (अकथितञ्च)[20] इति सूत्रस्यार्थः – अपादानादिविशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यात्। अस्य सूत्रस्य प्रवृत्तिः द्विकर्मकस्थले भवति। सूत्रस्यास्य यत्र प्रवृत्तिः भवति तत्र (कर्तुरीप्सिततमं कर्म)[21] इति सूत्रेण एव सिद्धं प्रधानं कर्म अन्यत्

[13] रामा. १.३३.१९, टीका.पृ. २३५
[14] पा.सू. १.४.४८
[15] पा.सू. २.३.३६
[16] पा.सू. १.४.४८
[17] पा.सू. २.३.२
[18] टीका.पृ. २३५
[19] रामा.१.३५.१६, टीका.पृ. २४२
[20] पा.सू. १.४.५१
[21] पा.सू. १.४.२९

भवेत्येवैति। तादृशकर्मणा युक्तमपादानमधिकरणं सम्प्रदानं वा भवति। तत्रापादानत्वेनाविवक्षित्वा कर्मत्वेन विवक्षायां कर्मसंज्ञा भवति। इत्यनेन सूत्रेण यस्य कर्मसंज्ञा भवति तद्गौणं कर्म इत्युच्यते। इत्थम् - सर्वे सुराः त्रिपथगां नदीं (गङ्गां) शैलेन्द्रं वरयामासुः (ययाचे) इति। सूत्रस्य प्रवृत्तिः द्विकर्मकस्थले। याचते इति धातुः द्विकर्मकः। एतदर्थकधातवोऽपि द्विकर्मकाः एव। यथा – भिक्षते, वरयामास, याचते, भिक्षते, भाषते, वक्ति इत्यादयः। कारिकायामस्यां सङ्गृहीताः एते धातवः –

दुह्याच्पच्दण्डरुधिप्रच्छिचिब्रूशास्जिमथ्मुषाम्।
कर्मयुक् स्यादकथितं तथा स्यान्नीहृकृष्वहाम्॥ इति।[22]

तर्हि अत्र सर्वे सुराः त्रिपथगां नदीं (गङ्गां) शैलेन्द्रं वरयामासुः (ययाचे) इति। याच् धातोरर्थरुत समानार्थकधातोः परस्वत्वनिवृतिपूर्वकस्वस्वत्वोत्पत्तिरूपं फलं तदनुकूलव्यापारश्च। स्वस्वत्वोत्पत्तिरूपफलाश्रयत्वात् गङ्गायाः (कर्तुरीप्सिततं कर्म)[23] इत्यनेन सूत्रेणैव कर्मत्वमिति। अतः गङ्गायाः मुख्यकर्मत्वमिति। शैलेन्द्रात् त्ववधित्वात् अपादानत्वम्। अनेन तदपादानत्वस्य अविवक्षायां कर्मत्वं विवक्ष्यते। अतोऽत्र शैलेन्द्रात् अप्रधानकर्मत्वम्। ततः उभयत्रापि (कर्मणि द्वितीया)[24] इति सूत्रेण द्वितीया भवति। यदापादानत्वमेव विवक्ष्यते तदा 'सर्वे सुराः त्रिपथगां नदीं (गङ्गां) शैलेन्द्रात् वरयामासुः (ययाचे) इति प्रयोगः सम्भवति। अतः टीकायामुच्यते – "अकथितं च" इति शैलेन्द्रस्य कर्मत्वम्।[25]

## निष्कर्ष

कारकप्रकरणं व्याकरणशास्त्रे हृदयभूतम्। हृदयपरिशीलनं हृदयचिकित्सां च वैद्याः सावधानेन मनसा कुर्वन्ति। तथैव कारकमप्यवहितेन चित्तेनावधारणीयं बोधनीयं च। तथैव भूषणटीकाकारः कारकाणां प्रयोगः कृतः। अत्र भूषणटीकायां कारकस्य प्रयोगः दर्शितः। पाणिनिः आदौ कारकसंज्ञां विधत्ते। ततो विभक्तिरभिधत्ते। तथैवात्रापि षड्कारकाणि च विविच्य कानिचन उदाहरणानि प्रोक्तानि।

## परिशीलनीयग्रन्थसूची

1. वाल्मीकिमुनिप्रणितं रामायणं तिलक-शिरोमणि-भूषणेति टीकात्रयेणोपस्कृतम्, परिमल पब्लिकेशन्स 26-27,शक्तिनगर दिल्ली 110007,
2. अष्टाध्यायी, ज्ञानभारती पाब्लिकेशन्, दिल्ली, २००
3. महाभाष्यं प्रदीपोद्योतसहितं छायाटिकोपेतञ्च, चौखाम्वा संस्कृतप्रतिष्ठान, वाराणसी
4. संस्कृतव्याकरणशास्त्रैतिहासविमर्शः, अशोकचन्द्रगौरशास्त्री,भारतीय विद्यासंस्थान, वाराणसी,1997
5. वैयाकरणसिद्धान्तकौमुदी भट्टोजिदीक्षितः, सम्पा.श्रीअर्कनाथचौधरी, प्रकाशकः जगदीशसंस्कृतपुस्तकालयः जयपुरः।
6. वैयाकरणसिद्धान्तकौमुदी भट्टोजिदीक्षितः, सम्पा. श्री.गोविन्दाचार्य, चौखाम्वा संस्कृत प्रतिष्ठान दिल्ली, 38 यू.ए बंगला रोड़, जवाहर नगर, दिल्ली
7. वैयाकरणसिद्धान्तकौमुदी, रचयिता - भट्टोजिदीक्षितः, २०१०, (सम्पादक : गिरिधरशर्मा), संस्करणम् वाराणसी, मोतीलाल बनारसीदास।
8. अष्टाध्यायी प्रथमावृत्तिः, रचयिता पाणिनिः, (व्याख्याता - ब्रह्मदत्तजिज्ञासुः), संस्करणम् - २००५, रामलाल कपूर ट्रस्ट, रेवली - सोनीपत, हरयाणा।
9. महाभाष्यम्, रचयिता पतञ्जलिः, (व्याख्याता चारुदेवशास्त्री), संस्करणम् २००
10. अमरकोशः (रामाश्रमीव्याख्योपेतः), अमरसिंहः, शिवदत्तदाधिमथः, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, १ ९ ७०.

[22] वै.सि. कारक प्रकरण
[23] पा.सू. १.४.२९
[24] पा.सू. २.३.२
[25] टीका.पृ. २४२